इत्येवं स्थिते यस्मिन् चान्द्रमासे रवेः राश्यन्तरसंक्रमो न जातः, तस्य तदुत्तरस्य च चान्द्रमासस्य उभयोर्मेषस्थे रवौ स्वारम्भात् उभयोरपि वैशाखता, तत्राद्योऽधिमासः संक्रान्तिहीनत्वात् द्वितीयः शुद्धः इति स्मृतौ प्रसिद्धम् । यथा मलमासतत्त्वे लघुहारीतः ॥ "इन्द्राग्नी यत्र हूयते" इत्युक्त्वा "तमतिक्रम्य तु रविर्यदा गच्छेत् कथञ्चन । आद्यो मलिम्लुचो ज्ञेयो द्वितीयः प्रकृतः स्मृतः । तस्मिंस्तु प्रकृते मासि कुर्य्यात् श्राद्धं यथाविधि । तथैवाभ्युदयं कार्य्यं नित्यमेकं तु सर्व्वदा" । "यदा तं दर्शान्तमासमतिक्रम्य तत्पूर्व्वमासान्त्यक्षणवृत्तिराशिस्थः सन् सूर्य्योऽतिवाह्य गच्छेत् मासान्तरे राश्यन्तरसंयोगं गच्छेत्तदाद्योऽतिक्रान्तो मासो मलिम्लुचो ज्ञेयः" । ज्योतिषे । "अमावास्याद्वयं यत्र रविसंक्रान्तिवर्जितम् मलमासः स विज्ञेयो विष्णुः स्वपिति कर्कटे" । "अमावास्याद्वयं अमावास्यान्त्यक्षणद्वयं रविसंक्रान्तिभ्यां क्रियोत्पत्तिरूपोत्तरसंयोगरूपाभ्यां यथाक्रमं वर्जितं तेन दर्शान्त्यक्षणद्वययोरेव क्रियोत्पत्त्युत्तरसंयोगाभ्यां यथाक्रमं संयोगेनाधिमासः । संक्रान्तेरेकक्षणे क्रियोत्पत्तिरपरक्षणे पूर्व्वसंयोगनाशः उत्तरसंयोगोत्पत्तिश्चेति क्षणद्वयवृत्तित्वमिति मीमांसकसिद्धान्तात्" । गृह्यपरिशिष्टज्योतिःपराशरौ । "रविणा लङ्घितो मासश्चान्द्रः ख्यातो मलिम्लुचः । तत्र यद्विहितं कर्म्म उत्तरे मासि कारयेत्" पराशरः । "पक्षद्वयेऽपि संक्रान्तिर्यदि न स्यात् सितासिते । तदा तन्मासविहितमुत्तरे मासि कारयेत्" । अत्र लङ्घनमसंक्रमणञ्च रवेस्तदा भवति यदा तन्मासतत्पूर्व्वमासान्त्यक्षणयोरेकराश्यवस्थितस्य तन्मासानन्तरसंयोगः, न त्वेकराशिस्थितस्य मासव्यापनमात्रं तथात्वे चतुर्द्दश्यामेकराशौ संक्रान्तस्य प्रतिपत्प्रथमक्षणेऽपरराशौ, तत्परराशौ च द्वितीयायां प्रतिपदि वा रवेः संयोगेऽपरस्यापि मलमासता स्यात्" । अतएव ज्योतिषे "अमावास्यापरिच्छिन्नं रविसंक्रान्तिवर्ज्जितम् । मलमासं विजानीयाद्गर्हितं सर्व्वकर्म्मसु । तस्यार्कोदर्शकस्यैकराशौ दर्शद्वयातिगः" । "अत्रैकराशिस्थार्कस्य दर्शद्वयातिगत्वमुक्तम् । एतच्च पूर्व्वोपदर्शितयोर्मासयोः पूर्व्वस्यैव सम्भवति न परस्य" । मलमासकारणन्तु ज्योतिषे । "दिवसस्य हरत्यर्कः षष्टिभागमृतौ सदा । करोत्येकमहश्छेदं तथैवैकञ्च चन्द्रमाः । एवमर्द्धतृतीयानामब्दानामधिमासकम् । ग्रीष्मे जनयतः पूर्व्वं पञ्चाब्दान्ते तु पश्चिमम्" । "तेन दिवसस्य तिथेः षष्टिभागं दण्डमेकं रविर्हरति छेदयति उत्तरे छेदमित्यभिधानात् । ततश्च ऋतौ मासद्वये षष्टिनाड़ीच्छेदादङ्कस्तिथेरेकच्छेदमाकर्षणं करोति । एवं चन्द्रोऽपि । एवमित्युक्तक्रमेण वर्षे द्वादशतिथ्यात्मककालाकर्षादर्द्धतृतीयानामन्ते अर्द्धं तृतीयं येषां ते तथा । ग्रीष्मे माधवादिषु षट्केषु पूर्व्वं माधवादित्रिकपतितं, पञ्चाब्दान्ते तु पश्चिमं श्रावणादित्रिकपतितं मलमासञ्चन्द्रार्कौ जनयतः" । मिहिरः । "माधवादिषु षट्केषु मासि दर्शद्वयं यदा । द्विराषाढः स विज्ञेयः शेते तु श्रावणेऽच्युतः । "मिथुनोपगतो भानुरमावास्याद्वयं स्पृशेत् । द्विराषाढः स विज्ञेयो विष्णुः स्वपिति कर्कटे" । "अमावास्याद्वयं तदन्त्यक्षणद्वयं स्पृशेत् संयुज्यात् न तन्मध्ये राश्यन्तरसंयोग इत्यर्थः" । "कन्यासिंहकुलीरेषु यदा दर्शद्वयं भवेत् । आगामिनि तदा वर्षे कुलीरे माधवः स्वपेत्" । यद्यपि "यां तिथिं समनुप्राप्य तुलां गच्छति भास्करः । तयैव सर्व्वसंक्रान्तिर्यावन्मेषं न गच्छति" इति "राजमार्त्तण्डवचनात्तुलादिषण्मासे तिथिवृद्ध्यभावाद्वर्षे द्वादशवृद्धिरनुपपन्ना तथापि "मध्ये विषुवतोर्भानुर्यान्यहानि तु वर्द्धयेत् । तैः सम्भूयाधिको मासः पतत्येव त्रयोदशः" इति "गृह्यपरिशिष्टवाक्ये विषुवतोर्मेषतुलासंक्रान्त्योर्मध्ये मेषादिषण्मास एव तिथिवृद्धिरुक्ता अहर्गणने मेषादिषण्मासे मन्दभुक्त्या सप्तदिनवृद्धिस्तुलादौ शीघ्रभुक्त्या दिनद्वयह्रासः" इति तथा च ज्योतिःशास्त्रम् "मेषादीनामहर्वृन्दं षण्णां सप्ताष्टचन्द्रकम् (१८७) । तुलादीनामष्टसप्तचन्द्रकन्तु(१७८) लिखेत् पृथक्" । "चन्द्र एकः "अङ्कस्य वामा गतिः" इत्यङ्कविदां समयात् व्युत्क्रमेणाङ्का बोध्याः । तेन दिनवृद्धि ५ क्रमसञ्चयाभ्यां ६ मेषादिषट्के एव एकादशतिथिवृद्धिः" । एवञ्च "गतेऽब्दद्वितये सार्द्धे पञ्चपक्षे दिनद्वये । दिवसस्याष्टमे भागे पतत्येकोऽधिमासकः" । इति "राजमार्त्तण्डोक्तः सप्तदशदिनाधिकाष्टमासाधिकवर्षद्वयेऽधिमासः । स च सौरे मासि सप्तदशदिनोत्तरं चान्द्रमासलङ्घनासम्भवात् सावनमानेन ज्ञेयः इति" । सिद्धान्तशिरोमणौ तु ४३२०००००० कल्पप्रमाणवर्षेषु १५९३३००००० एतन्मिता अधिमासा भवन्तीत्युक्तम् यथा "लक्षाहता देवनवेषुचन्द्राः कल्पेऽधिमासाः कथिताः सुधीभिरिति" । "अत्रोपपत्तिः प्रकृतास्तावद्रविमासास्तेभ्यश्चान्द्रमासा यावद्भिरधिकास्तावन्तोऽधिमासा" इति । तदेवाह । "रवेः कोटिनिघ्नाः कृताऽष्टेन्दुवाणाः" ५१८४०००००००
"सुराग्न्यब्धिरामेषवो लक्षनिघ्नाः ५३४३३३००००० ।